VIDYA - A JOURNAL OF GUJARAT UNIVERSITY

*Peer-Reviewed, Multidisciplinary & Multilingual Journal*

**ISSN:** 2321-1520 **E-ISSN:** 2583-3537

# व्यञ्जनाविषये जगदीशतर्कालङ्कारमतविमर्शः

## प्रो. डॉ. मयूरी भाटिया

संस्कृतविभागः, भाषा-साहित्यभवनम्,
गुजरात युनिवर्सिटी, अहमदाबाद.

### सारांश

काव्यस्य लक्षणानुसारं वयं जानीमः यत्काव्ये शब्दार्थयोः साहित्यं भवति । एवं तयोः नित्यः संबन्धः भवति । स संबन्धः एव काव्यशास्त्रे वृत्तिः,शक्तिः इत्यादिभिः विविधैः नामभिः अभिधीयते । तत्र केचन अभिधालक्षणाव्यञ्जनादयः तिस्रः वृत्तयः सन्तीति कथयन्ति । तत्र सामान्यतः साहित्यशास्त्रे तिस्रः अपि वृत्तयः स्वीकृताः परन्तु जगदीशतर्कालङ्कारेण व्यञ्जना वृत्तिः नैव स्वीकृता । तस्याः अन्तर्भावः तेन लक्षनायामेव कृतः इति शोधपत्रेऽस्मिन् समीक्षितम् ।

### परिचयः

तार्किकप्रवरेण जगदीशतर्कालङ्कारेण स्वकीयायां शब्दशक्तिप्रकाशिकायां व्यञ्जनावृत्तिः निराकृता लक्षणया मानसबोधेन वा व्यङ्गयार्थप्रतीतिः भवति इति तस्य मतम् अत्र उपस्थाप्य यथामति विविच्यते ।

'मुखं विकसितस्मितमि'त्यादौ[1] कुसुमतुल्यसौरभत्वाद्यर्थस्य प्रतीतिः व्यन्जनया भवति इति ध्वनिवादिनां मतम् । प्रस्तुते विकासस्य पुष्पधर्मस्य मुखेऽनुपपन्नत्वात् लक्षणया विकासेन असंकुचितत्वसम्बन्धेन सच्छवित्वविस्तारित्वाद्यर्थो लक्ष्यते । तदनन्तरं कुसुमतुल्यसौरभत्वादिरूपो लक्षणायाः प्रयोजको योऽर्थः प्रतीतिपदवीम् अवतरति, असौ न लक्षणाबोध्यः, तस्याः सच्छवित्वविस्तारित्वरूपिणं लक्ष्यार्थं प्रतिपाद्य विश्रामात्, मुख्यार्थबाधाद्यभावे विरतायाश्च तस्याः पुनः अनुदितत्वात् । अभिधापि तमर्थं प्रतिपादयितुं न समर्था, सौरभाद्यर्थे असङ्केतितत्वात् । अयं सौरभाद्यर्थः शब्दाद् एव प्रतिपद्यते, अतः तदर्थप्रत्यायको व्यापारः शब्दस्य एव सम्भवति । ध्वनिवादिनां मतेऽसौ व्यापारः अभिधालक्षणादिव्यापारातिरितः व्यञ्जनाख्यः एव । पर जगदीशेन सौरभाद्यर्थप्रत्यायनार्थं लक्षणा स्थाप्यते, व्यञ्जना च सर्वथा निषिध्यते ।

### जगदीशतर्कालङ्कारमतविमर्शः

तन्मते लक्षणाबीजत्वेन स्वीकृतम् अनुपपत्तिज्ञानं न लक्षणाजनकं, शक्यसम्बन्धात्मिकायाः लक्षणायाः अन्वयानुपपत्तेः ज्ञानस्य अजन्यत्वात् । नापि अन्वयानुपपत्तिज्ञानं लक्षणाज्ञानजनकं, लाक्षणिकात् गङ्गापदात्

'गङ्गापदं तीरलाक्षणिकं तीरार्थकतया प्रामाणिकप्रयुक्तपदत्वात्' इति अनुमानेनापि तटादिलक्ष्यार्थप्रतीतेः सम्भवात् । अत्र अयम् आशयः यत् प्रामाणिकैः अन्वयानुपपत्तिज्ञानं लक्षणायाः बीजत्वेन स्वीकृतम् । एतद् अन्वयानुपपत्तिज्ञान

[1]मुखं विकसितस्मितं वशितवक्रिमप्रेक्षितं
समुच्छलितविभ्रमा गतिरपास्तसंस्था मतिः ।
उरी मुकुलितस्तनं जघनमंसबन्धोद्धुरं
बतेन्दुवदनातनौ तरुणिमोद्गमो मोदते ।।
-मम्मटः, काव्यप्रकाशः २.१३

http://vidyajournal.org


© 2022 Vidya – A Journal of Gujarat University

**ISSN:** 2321-1520 **E-ISSN:** 2583-3537

लक्षणाबीजत्वेन जगदीशमतेन अयुक्तम् । अन्वयानुपपत्तेः अभावे प्रकरणादितोऽपि तात्पर्यानुपपत्तिबलात् लक्ष्यार्थस्य अवगतेः । तथाहि- 'यष्टीः प्रवेशय', 'काकेभ्यो दधि रक्ष्यताम्' इत्यादौ मुख्यार्थान्वयानुपपत्तिज्ञानेन विना अपि यष्टिधरत्वदध्युपघातकत्वादिलक्ष्यार्थस्य अवगतिः भवति ।[2] अतो यथा प्रस्तुते अन्वयानुपपत्तिं विनापि लक्षणा तथैव 'मुखं विकसितस्मितम्' इत्यादौ कुसुमतुल्यसौरभवाद्ययंप्रतीतौ अपि लक्षणा प्रवर्तते । लक्षणामूलव्यञ्जनास्थले लक्षणया एव तादृशो बोधः भवति इत्यतो ध्वनिवादिनां व्यञ्जना निष्प्रयोजना इति जगदीशतर्कालङ्कारस्य आशयः ।

'भद्रात्मनो दुरधिरोहतनोः'[3] इत्यादौ ध्वनिवादिभिः अप्राकरणिकगजरूपार्थप्रतिपत्तये यद् व्यञ्जना आश्रीयते तदपि जगदीशेन निरस्तम् । तन्मते 'अयं गौरवितो महान्', 'वयस्था नागरासङ्गादङ्गानां हन्ति वेदनाम्' इत्यादौ अयं गौरवितः = पूज्यः महानिति प्राकरणिकार्थप्रतीतेः अनन्तरं 'अयं गौः = जडः, अवितः = मेषतः महान् पीनः' इति अप्राकरणिकस्य परोपहासरूपिणः अर्थस्य च या प्रतीतिः सा अभिधयैव सम्पाद्या न तु व्यञ्जनया ध्वनिवादिनां मते त्वत्र अभिधायाः 'अयं पूज्यो महान्' इति प्राकरणिकेऽर्थे नियंत्रणात्, अप्राकरणिकस्य 'अयं गौः अवितः = मेषतः महान् स्थूलः' इत्यर्थस्य प्रतीतिः व्यञ्जनया भवति । परं जगदीशमतेन एवंविधेषु स्थलेषु तात्पर्याभावबुद्धेः अप्राकरणिकार्थप्रतीतिं प्रति प्रतिबन्धकत्वेन अवस्थानाद् द्वितीयार्थस्य अप्राकरणिकस्य प्रतीतिः एव न उद्भवति ।[4] नानार्थस्थलेषु तात्पर्यभावबुद्धिः व्यञ्जनायाः उल्लासिका । अतः शक्यार्थातिरिक्ता वक्तुः तात्पर्याभावान् निस्तातपर्यकत्वधीः व्यंञ्जनायाः प्रतिबन्धिका । तथा चान्यार्थतात्पर्यज्ञानासत्त्वेऽपि यदि अन्यार्थप्रतीतिः आस्थीयते तदा शक्तिज्ञानादिसाचिव्येन असौ सेत्स्यतीति तदवगमयितुं व्यञ्जना न स्वीकर्तव्या ।

किञ्च नानार्थस्थले द्वितीयार्थस्य अप्राकरणिकस्य भवन्ती प्रतीतिः न खलु शाब्दी एव किन्तु मानसी अपि । रसादिबोधेऽपि व्यञ्जना न अङ्गीकार्या मानसस्यापि बोधस्य चमत्कारजनकत्वसम्भवात् । तथा च न केवलं लक्षणामूलध्वनौ अभिधामूलध्वनौ एव अपि तु रसादिध्वनौ अपि मानसबोधस्य हेतुत्वेन अवस्थानात् सर्वथा व्यञ्जना उत्पाटिता भवति ।[5]

वस्तुतस्तु जगदीशमते नानार्थकस्थले यदि अप्राकररिणकार्थस्य बोधः, तर्हि अपि असौ न व्यञ्जनाबोध्यः अपि तु मानसबोधजन्य एव अवगन्तव्यः । एवमेव शृङ्गारादिरसस्यापि मानसबोधविषयत्वम् । किञ्च नानार्थकस्थलेषु प्रतीतिपथमवतीर्णः अर्थः यदि शब्दप्रमाणवेद्यः स्यात् तदा एव तदधीनायाः व्यञ्जनायाः सिद्धिः । यतो हि द्वितीयस्य अप्राकरणिकस्य अर्थस्य प्रतीतिरेव प्रथमं न समुदेति, भवति च यदि प्रतीतिः तदा असौ न शाब्दी प्रत्युत मानसी, अत एवा अज्ञाताया व्यञ्जनायाः सद्भावः अपि अप्रामाणिक एव । अत्र व्यञ्जनायां प्रत्यक्षं तावन्न प्रमाणं तस्याः इन्द्रियायोग्यत्वात्

---

[2] तत्रान्वयानुपपत्तिज्ञानस्य लक्षणाबीजत्वं हि न तज्जनकत्वं शक्यसम्वन्धात्मिकाया लक्षणायास्तदजन्यत्वात् नापि तज्ज्ञापकत्वं मुख्यार्थान्वयानुपपत्तिज्ञानमन्तरेणापि प्रमाणान्तरेण तद्ग्रहसम्भवात् । अत एव न लक्ष्यार्थतात्पर्यग्राहकत्वमपि प्रकरणादितोऽपि लक्ष्यार्थपरत्वग्रहात् । न च लक्षणाजन्यान्वयबोधं प्रति तस्याः कारणत्वमेव लक्षणाबीजत्वमिति साम्प्रतम्, यष्टीः प्रवेशयेत्यादौ व्यभिचारात्, तादृशहेतुतायां प्रमाणाभावाच्च ।

- सम्पादकः, शास्त्री पण्डितढुण्डिराजः, श्री जगदीशतर्कालिंकारकृता - शब्दशक्तिप्रकाशिका, पृ० १४६

[3] भद्रात्मनो दुरधिरोहतनोर्विशाल-

वंशोन्नतेः कृतशिलीमुखसंग्रहस्य ।

यस्यानुपप्लुतगतेः परवारणस्य

दानाम्बुसेकसुभगः सततं करोऽभूत् ॥

-मम्मटः, काव्यप्रकाशः, २,१६.

[4] वस्तुतस्तु शक्त्याद्युपस्थितानामनेकविधानां पदार्थानामन्वयमतेरनन्तरं यद्यन्यविधानामन्वयबोधः स्यात्, स्यादपि तदनुरोधेन व्यञ्जनाविचारः । न चैवं तत्तदर्थकशब्दसामान्यं प्रत्येव तत्तदर्थनिस्तात्पर्यकत्वधियः प्रतिबन्धकत्वात् ।

-सम्पादकः शास्त्री पण्डित ढुण्डिराजः, जगदीशतर्कालंकारकृता शब्दशक्तिप्रकाशिका, पृ० १४७ ।

[5] तत्तदर्थानां यथाकथञ्चिदुपनयवशेन मनसैव विशिष्टधीसम्भवात् मानोरथिकसुखप्रभेदपर्यवसितं चमत्कारं प्रत्येव शाब्दस्येव मानसस्यापि बोधस्य विशिष्य हेतुतायाः सुवचत्वात्, अतिरिक्तस्य व्यञ्जनाख्यपदार्थान्तरस्य स्वरूपसत्तया अन्वयबुद्धौ तद्धेतुत्वस्य च प्रमाणविरहेणासत्वाच्च ।

-सम्पादकः शास्त्री पण्डित ढुण्डिराजः, जगदीशतर्कालंकारकृता शब्दशक्तिप्रकाशिका, पृ० १४७ ।

http://vidyajournal.org

VIDYA - A JOURNAL OF GUJARAT UNIVERSITY

*Peer-Reviewed, Multidisciplinary & Multilingual Journal*

**ISSN:** 2321-1520 **E-ISSN:** 2583-3537

। नापि अनुमानं लिङ्गाभावात् शाब्दबोधरूपलिङ्गस्य अपि असिद्धत्वाच्च । नाप्युपमानं तस्य शक्तिमात्रग्राहकत्वात् । नापि शब्दः शक्तिग्राहकाभावात् । एवञ्च तस्या असिद्धौ तथा सममन्वयव्यतिरेकयोः ग्रहासम्भवेन तस्याः स्वरूपसत्याः शाब्दहेतुत्वस्य अपि असम्भवः । एवं मानसबोधेन व्यङ्ग्यार्थस्य अवगतौ तद्द्योतनार्थं व्यञ्जनाश्रयणम् अहेतुकम् एव इति जगदीशस्य आशयः ।

अत्र प्रतिसमाधीयते । 'मुखं विकसितस्मितम्' इत्यादौ यज्जगदीशेन सौरभत्वाद्यर्थस्य वैयञ्जनिकी प्रतीतिः प्रत्याख्याता न तद् युक्तियुक्तम् । अत्र लक्षणाया विषयः सच्छवित्वविस्तारित्वरूपो लाक्षणिकः अर्थः एव न अतिरिक्तः कश्चिदर्थः । लक्षणाया प्रयोजनायितस्य सौरभादिरूपिणः अर्थस्य लक्षणया प्रतीतौ मूलक्षयकारिणी अनवस्था भवेत् । अन्वयानुपपत्तिज्ञानं विना प्रकरणाद्यपेक्षया अपि लक्ष्यार्थप्रतीतिः भवतीति न विप्रतिपद्यामहे । परं लक्षणा युगपत् स्मितसौरभरूपिणौ अर्थौ प्रतिपादयितुं न समर्था । अतः सौरभाद्यर्थे व्यङ्ग्ये शब्दैकगम्ये सति तद्बोधार्थं व्यञ्जना शब्दस्य एव व्यापारः स्वीकार्यः ।[6]

यच्च जगदीशेन तात्पर्याभावबुद्धेः प्रतिबन्धकत्वाद् अपरार्थप्रतीतिः निराक्रियते तदपि न शोभनम् । 'अयं गौरवितो महान्' इत्यादौ नानार्थकशब्द प्रयोग एव प्रकटयति यदत्र प्रयोक्तुः तात्पर्यम् अपरस्मिन्नर्थे पर्यवसितम् । अन्यथा अनेकार्थकशब्दोपनिबन्धः व्यर्थः एव स्यात् । अनेकार्थकशब्दप्रयोगस्थलेषु मुख्यातिरिक्तार्थप्रत्यायने वक्तुः तात्पर्यम् अस्त्येव । अत एव अपरार्थः काव्यतत्त्वज्ञैः आस्वाद्यते । अपरार्थस्य प्रतीतिरेव न भवतीति जगदीशवचनं सर्वथा विचारणीयं तत्प्रतीतौ सहृदयहृदयसाक्षिकत्वात् । इत्थं सहृदयहृदयानुभवसिद्धस्य अर्थस्य निस्तात्पर्यकत्वाद् अपलापो न उचितः ।

यच्च जगदीशेन अपरार्थप्रतीतेः शब्दव्यापारसमप्यत्व निरस्य तस्याः मानस बोधः सिद्धान्तितः तदपि अयुक्तमेव । यतो हि या मानसबोधाद् व्यञ्जनायाः उच्छेदः तथैव वाच्यार्थस्य लक्ष्यार्थस्य अपि च मानसबोधे शक्तिलक्षणयोः अपलापः प्रसज्येत । किञ्च इन्द्रियजन्यं प्रत्यक्षम् एवं लिङ्गपरामर्शजन्यम् अमानमपि च व्यङ्ग्यार्थवत् मानसबोधविषयौ स्याताम् । तथा च प्रमाणान्तरोच्छेदप्रसङ्गः स्यात् यदि ज्ञानमात्रं प्रति मनः साधारणकरत्वेन अङ्गीकियते तर्हि न वक्तव्य किञ्चित् । एवं चेत् व्यङ्गयार्थबोधेऽपि मनसः कारणता ध्वनिवादिभि स्वीक्रियते । परन्तु यदि शक्यार्थलक्ष्यार्थयोः प्रतीतौ मनसः कारणतायामपि अभिधालक्षणाख्यौ शब्दस्य व्यापारौ स्वीकियेते, तथा व्यङ्ग्यार्थस्य मानसबोधेऽपि व्यञ्जनाव्यापार स्वीकार्य एव । अन्यथा प्रमाणान्तरमपि नाङ्गीकार्यम् सर्वस्य मानसबोधविषयत्वात् । वस्तुतस्तु यथा अभिघालक्षणे शब्दस्य व्यापारत्वेन प्रामाणिकैः स्वीकृते, तथैव 'शब्दबुद्धिकर्मणां विरम्य व्यापाराभावः' इति नयेन व्यङ्गयार्थप्रत्यायने अभिधालक्षणयोः असामर्थ्ये शब्दादेव अनुभूयमानोऽर्थः शब्दप्रमाणस्यैव विषयः । इत्थं प्रयोजनादेः अर्थस्य प्रतीतिः शाब्दी एव न मानसी । तथा च व्यञ्जनायाः शब्दव्यापारत्वं सिद्धम् ।

---

[6] (क) अत्रेदं वक्तव्यम् । कि व्यञ्जनैव नास्तीति ब्रूषे, उत तस्याः पदवृत्तत्वं नास्तीति । नाद्यः । अनया कटाक्षेणाभिलाषो व्यञ्जितः' इति सर्वजनप्रसिद्धेस्तथैवानुभवाच्च चेष्टावृत्तिव्यञ्जनाया अपलपितुमशक्यत्वात् । नान्त्यः । 'गतोऽस्तमर्क' इत्यादिवाक्याद गुरुं प्रति सन्ध्या वन्दनतात्पर्येण प्रयुक्तात् प्रतिवेश्यादीनामभिसरणोपक्रमादिबोधस्य वक्तृतात्पर्याभावेन लक्षणयोपपादयितुमशक्यत्वात् ।

-सम्पादकः, भारद्वाजः पण्डितो गंगानाथ शास्त्री, मौनिश्रीकृष्णभट्टविरचिता वृत्तिदीपिका, पृ० १६

(ख) इदं पदमेतदर्थस्य न वाचकम्, नापि लक्षकं नापि स्मारकम् । अपितु व्यञ्जनया बोधकमिति प्रामाणिकव्यवहारेणाप्यतिरिक्ततत्सिद्धेश्च । -

-सम्पादकः फडके अनन्त शास्त्री, श्री नागेशभट्टविरचिता वैयाकरणसिद्धान्तलघुमञ्जूषा, श्रीमद्बालंभट्टविरचिता कलाटीका, पृ० १५६

http://vidyajournal.org


© 2022 Vidya – A Journal of Gujarat University